**ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗೆ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :**

1) ಇದು ಪ್ರಶ್ನೆ ಸಹಿತಾ ಉತ್ತರ ಪುಸ್ತಕವಾಗಿದೆ.

2) ಪ್ರತಿಪ್ರಶ್ನೇಗೂ ಉತ್ತರ ಬರಯಲು ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯಲ್ಲಿಯೇ ಸ್ಥಾವಕಾಶ ಮಾಡಿಕೊಡಲಾಗಿದೆ ಉತ್ತರಗಳನ್ನು ನಿರ್ದಿಷ್ಟಪಡಿಸಿದ ಜಾಗದಲ್ಲಿಯೇ ಬರೆಯಬೇಕು.

3) ಈ ಪ್ರಶ್ನೋತ್ತರ ಪತ್ರಿಕೆಯ ಹೊಂದಿಸಿ ಬರೆಯಿರಿ ಪ್ರಶ್ನೆಯು ಒಳಗೊಂಡಂತೆ ಒಟ್ಟು 54 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೋಂದಿರುತ್ತದೆ.

4) ಪರೀಕ್ಷಾರ್ಥಿಗಳು ಉತ್ತರಗಳನ್ನು ಪೇನ್ಸಿಲನಿಂದ ಬರೆಯಬಾರದು. ಬರೆದರೆ ಅಂತಹ ಉತ್ತರಗಳನ್ನು ಮೌಲ್ಯಮಾಪನಕ್ಕೆ ಪರಿಗಣಿಸಲಾಗುವುದಿಲ್ಲ.

---

**परीक्षार्थिनां सामान्याः सूचना :**

1) इदं प्रश्न्युक्तम् उत्तरपुस्तकं वर्तते।

2) प्रत्येकं प्रश्नस्य उत्तरं लेखितुं पर्याप्तः स्थलावकाशः प्रकल्पितः। निर्धारितेषु स्थानेषु एव उत्तराणि लेखनीयानि।

3) अस्मिन् प्रश्नयुक्त उत्तरपुस्तके 'संयोज्य लिखत' सह आहत्य चतुःपञ्चाशत् [54] प्रश्नाः भवन्ति।

4) परीक्षार्थिनः उत्तराणि पेन्सिल्द्वारा न लिखेयुः। पेन्सिल्द्वारा लिखितानि उत्तराणि मौल्यमापनार्थं न परिगण्यते।

---

**I. क्रमाक्षरेण सह निर्दिष्टस्थाने लिखत।** **[15×1=15]**

1. एषः परमो धर्मः।

   (A) आचारः (B) विचारः

   (C) सद्विचारः (D) योगः

2. 'अधमः' पदस्य विरुद्धार्थकपदम् इदं भवति।

   (A) उत्तमः (B) मध्यमः

   (C) चतुरः (D) नीचः

3. नर्मदा नदी अत्र प्रवहति।

   (A) उत्तरप्रदेशे (B) मध्यप्रदेशे

   (C) आन्ध्रप्रदेशे (D) कर्नाटके

4. अस्माकं शरीरं एताभिः सुदृढं स्वस्थं च भवति।

(A) सात्विकआहारैः (B) व्यायामैः

(C) क्रीडाभिः (D) योगासनैः

5. विश्ववन्द्यसरस्वती स्वामी अत्र आसीत्।

(A) कडतोकाग्रामे (B) होन्नावरे

(C) धर्मस्थले (D) यल्लापुरे

6. साधूनाम् : रक्षणाय :: दुष्टानाम् : ——— अत्र चतुर्थ पदम् इदं भवति।

(A) परिवर्तनाय (B) दण्डनाय

(C) विनाशाय (D) पोषणाय

7. मरालः एनं विना न रमते।

(A) मानसम् (B) मनसम्

(C) नीरम् (D) वृष्टिजलम्

8. द्वयोः मध्ये एकस्य गुणविशेषं वक्तुमं एषः प्रत्ययः भवति।

(A) तरप् (B) तमप्

(C) अण् (D) तल्

9. ''समुद्रः'' पदस्य पर्यायपदम् इदं भवति।

(A) सरः (B) सरोवरः

(C) सागरः (D) सरित्

10. शिला ईत्दशी आसीत्।

(A) उत्तमा (B) मृदुः

(C) कठिणा (D) बृहती

11. यः दुष्टकार्यतत्परः सः एषः।

(A) दुष्टः (B) अन्धः

(C) अज्ञानी (D) मूर्खः

12. चम्पूरामायणस्य कर्ता एषः।

(A) भासः (B) बाणः

(C) भोजराजः (D) सोमदेवः

13. एतस्य शिरसि केशाः न आसन्।

(A) सेवकस्य (B) देवदत्तस्य

(C) चन्दनकस्य (D) वैद्यराजस्य

14. ''सौदामनी' कथा एतस्मात् ग्रन्थात् स्वीकृता।

(A) हितोपदेशात् (B) पञ्चतन्त्रात्

(C) कथासरित्सागरात् (D) रामायणात्

15. देवशर्मणः पुत्रः एषः।

(A) वेदशर्मा (B) रविवर्मा

(C) सोमशर्मा (D) देववर्मा

**II. रिक्तस्थानं पूरयत।** **[5×1=5]**

16. गुरूः ........................... दैवतम्।

17. प्रथमं ........................... नियमं जानीत।

18. यद्यदाचरति ........................... तत्तदेवेत्तरो जनः।

19. क्रियापदानां मूलं रुपं ........................... इति कथ्यते।

20. तदर्थं नास्ति ........................... अपेक्षा।

**III. 21. संयोज्य लिखत।** **[5×1=5]**

| अ | ब | उत्तरम् |
|---|---|---|
| (1) सोन्दा | (A) वैद्यराजः | ........................................................ |
| (2) विद्या | (B) पार्थः | ........................................................ |
| (3) दुग्धम् | (C) निरङ्गुलिः | ........................................................ |
| (4) चन्दनकः | (D) सर्वस्य भूषणम् | ........................................................ |
| (5) बाहुरस्ति | (E) गीतामृतम् | ........................................................ |
| | (F) ऐतिहासिकक्षेत्रम् | |
| | (G) फलामृतम् | |

**IV. एकवाक्येन उत्तरं लिखत।** **[8×1=8]**

22. सुखदायिनी का ?

23. विद्याभ्यासार्थं जोशीमहोदयः कुत्र आगतवान् ?

24. कति समासाः सन्ति ?

25. कविः कां न कामयते ?

26. का क्षीणा सञ्जाता ?

27. ब्राह्मणरुपेण कः प्रविशति ?

28. सर्वस्य भूषणं किम् ?

29. ब्राह्मणः कथं जीवनं करोति स्म ?

**V. लघूत्तराणि लिखत।** **[5×2=10]**

30. भगवान् कदा आत्मानं सृजति ?

31. प्रश्नितं रामचन्द्रं भृगुपतिः किम् ऊचे ?

32. जोशीमहोदयस्य सन्देशः कः ?

33. नृसिंहभूपालः पुत्रसन्ततिं कथं प्राप्तवान् ?

34. राजा काम् अरक्षत् ? कथम् अरक्षत् ?

**अथवा**

मूर्तिरुपेण स्थिता शिला सखीम् किम् अवदत् ?

**35. सन्धिं विभज्य नाम लिखत।** **[2]**

(i) देव उवाच

(ii) गीतामृतम्

**36. विग्रहवाक्यं विलिख्य समास नाम लिखत।** **[2]**

(i) पीताम्बरः

(ii) पञ्चवटी

**श्लोकतात्पर्यं कर्णाटकभाषया वा आङ्ग्लभाषया लिखत।** **[2×2=4]**

37. दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम्
वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम् ।।

38. जातं वंशे भुवनविदिते पुष्करावर्तकानां।
जानामि त्वां प्रकृतिपुरुषं कामरुपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽह
याञ्चा मोघा वरमधिगुणे नाधमे लब्धकामा ।।

**अथवा**

जातस्यं हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽथे न त्वं शोचितुमर्हसि ।।

**39. कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत।** **[2]**

(i) गणेशः कथां लिखन् अस्ति।

(ii) कुमारः पाठं पठितवान्।

**40. इतरवचनरुपाणि लिखत।** **[2]**

(i) देवः ..................... .........................।

(ii) ........................ पठावः .....................।

**41. अलङ्कारं विवृणुत।** **[2]**

मुखम् एव कमलम्।

**42. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दो नाम लिखत।[2]**

साहित्य सङ्गीत कलाविहीनः

**एतयोः कव्योः देशकालग्रन्थादीनां विषये लिखत।** **[2×2=4]**

43. कालिदासः

44. सोमदेवः

**VI. निर्देशानुसारं लिखत।** **[2×3=6]**

45. 'भवान् एव दोषभाक्'।

कः पाठः ? का अवदत् ? कम् अवदत् ?

46. 'कथं तादृशम् उन्नतं स्थानं स्वीकर्तुं शक्नोमि'' ?

का उक्तवती ? तत् स्थानं किम् ? कान् प्रति उक्तवती ?

**दशवाक्यमितम् उत्तरं कर्णाटकभाषया, आङ्गलभाषया, संस्कृतभाषया वा लिखत।** **[3×3=9]**

47. इयं संस्कृतभाषा कथम् अस्ति ?

48. कृपणस्य कल्पनायाः परिणामः कः ?

49. त्यागस्य फलं कथं भवति ?

**अथवा**

सहस्रलिङ्गक्षेत्रं वर्णयत।

**VII. श्लोकौ पूरयत।** **[2×4=8]**

50. अजं निर्विकल्पं ........................................

.......................................................

.......................................................

............................................... भजेम ।।

51. निन्दन्तु नीतिनिपुणा ........................................

.........................................................

.........................................................

................................................ न धीराः ।

52. प्रवासार्थं धनं प्रेषयितुं पितरं प्रति पत्रमेकं लिखत। **[4]**

**अथवा**

दिनद्वयस्य विरामं सम्प्राथ्य मुख्योपाध्यायं प्रति विरामपत्रमेकं लिखत।

VIII. 53. **प्रबन्धं लिखत।** **[5]**

परिसरमालिन्यम् अथवा भारतदेशः

54. **गद्यभागं पठित्वा प्रश्नानाम् उत्तरं लिखत।** **[5×1=5]**

कृषीवलः ग्रामे निवसति। सः अहोरात्रि कृषिकार्यं करोति। तस्य गृहे धेनुः श्वानः इत्यादयः प्राणिनः भवन्ति। सः आनन्देन जीवनं यापयति। कृषीवलः लोकाय अन्नं ददाति।

**प्रश्नाः**

(i) कः ग्रामे निवसति ?

(ii) सः अहोरात्रि किं करोति ?

(iii) कः लोकाय अन्नं ददाति ?

(iv) तस्य गृहे के के प्राणिनः भवन्ति ?

(v) सः कथं जीवनं यापयति ?

❒❒❒